M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 1223

Title: Vrutta Ratnakara

1223

Vritta Ratnākara	: Title
	: Author
	: Editor
	: Year, Vols.
	: Publisher
1223	: Remarks

श्रीगणेशायनमः सुखसंतानसिद्ध्यर्थंनत्वाब्रह्माच्युतार्चितं गौरीविनाय
कोपेतंशंकरंलोकशंकरं १ वेदार्थशैवशास्त्रज्ञःपव्येकोभट्टद्विजोत्तमः तस्य
पुत्रोस्तिकेदारःशिवपादार्चनेरतः २ तेनेदंक्रियतेछंदोलक्ष्यलक्षणसंयुतं वृ
त्तरत्नाकरंनामबालानांसुखबुद्धये ३ पिंगलादिभिराचार्यैर्यदुक्तंलौकिकं
द्विधा मात्रावर्णविभेदेनछंदस्तदिहकथ्यते ४ षडध्यायनिबद्धस्यछंदसो
स्यपरिस्फुटं प्रमाणमपिविज्ञेयंषड्विंशदधिकंशतं ५ म्यरस्तजभ्नगैर्लां
तैरेभिर्दशभिरक्षरैः समस्तंवाङ्मयंव्याप्तंत्रैलोक्यमिवविष्णुना ६ सर्व
गुर्मोमुखांतलौयरावंतगलौसतौ ग्मध्याद्यौज्भौत्रिलोनोष्टौभवंत्य

त्रगणास्त्रिकाः ७ ज्ञेयाःसर्वादिमध्यांतगुरवोत्रचतुःकलाः गणाश्चतुर्लघू
पेताःपंचार्यादिषुसंस्थिताः ८ सानुस्वारोविसर्गांतोदीर्घोयुक्तपरश्चयः वापा
दांतेस्त्वसौग्वक्रोज्ञेयोन्योमात्रिकोल्ऋजुः ९ पादादाविहवर्णस्यसंयोगःक्रम
संज्ञकः पुरस्थितेनतेनस्याल्लघुतापिक्वचिद्गुरोः १० इदमस्योदाहरणं तरु
णंसर्षपशाकंनवौदनंपिच्छलानिचदधीनि अल्पव्ययेनसुंदरिग्राम्यजनोमिष्ट
मश्नाति ११ आब्धि४ भूत५ रसा६दीनांज्ञेयाःसंज्ञाःक्लोकतः ज्ञेयःपा
दश्चतुर्थांशोयतिर्विच्छेदसंज्ञिका १२ युक्समंविषमंचायुक्स्थानंसद्भिर्नि
गद्यते सममर्द्धसमंवृत्तंविषमंचतथापरं १३ अंघ्रयोयस्यचत्वारस्तुल्यल
क्षणलक्षिताः तच्छंदःशास्त्रतत्त्वज्ञाःसमंवृत्तंप्रचक्षते १४ प्रथमांघ्रिसमो
यस्यतृतीयश्चरणोभवेत् द्वितीयस्तुर्यवद्वृत्तंतदर्धसममुच्यते १५

वृत्तरत्नाकर
२

यस्यपादचतुष्केपिलक्ष्मभिन्नंपरस्परं ६ तदाहुर्विषमंवृत्तंछंदःशास्त्रविशारदाः १६
आरभ्यैकाक्षरात्पादादेकैकाक्षरवर्धितैः पृथक्छंदोभवेत्पादैर्यावत्षड्विंशतिंगतं।
१७ तदूर्ध्वंचंडवृष्ट्यादिदंडकाःपरिकीर्तिताः शेषंगाथास्त्रिभिःषड्भिःचरणैश्चो
पलक्षिताः १८ उक्ता१ सुक्ता२ तथामध्या३ प्रतिष्ठा४ न्यासुपूर्विका५ गायत्र्यु६
ष्णि७ गनुष्टुप्८ बृहती९ पंक्ति१० रेवच ११ त्रिष्टुप्१२ जगती१३ चैवतथातिजग
ती१३ मता शक्वरी१४ सातिपूर्वा१५ स्यादष्ट्य१६ त्यष्टी१७ ततःस्मृते २० धृति१८
श्चातिधृति१९ श्चैवकृतिः२० प्रकृति२१ राकृतिः२२ विकृतिः२३ संकृतिः२४ स्तथापि
प्रोक्ताभिःकृति२५ रुत्कृतिः२६ २१ इत्युक्ताश्छंदसांसंज्ञाःक्रमशोवच्मिसांप्रतं
लक्षणंसर्ववृत्तानांमात्रावृत्तानुपूर्वकं २२ इतिश्रीभट्टकेदारविरचितेवृत्तर
त्नाकराख्येछंदसिप्रथमोध्यायः श्रीः लक्ष्मैतत्सप्तगणागोपेतांभवतिनेहवि
षमेजः षष्ठोयंनलघुवाप्रथमेर्धेनियतमार्यायाः १ षष्ठेद्वितीयलात्परके २

धे

ले मुखलात्सयतिपदनियमः चरमेर्धेपंचमकेतस्मादिहभवतिषष्ठोलः २ त्रिषंशकेषुपा
दोदलयोराद्येषुदृश्यतेयस्याः पथ्येतिनामतस्याःछंदोविद्भिःसमाख्यातं ३ उल्लंघ्यग
णत्रयमादिमंशकलयोर्द्वयोर्भवतिपादः यस्यास्तांपिंगलनागोविपुलामितिसमा
ख्याति ४ उभयार्धयोर्जकारोद्वितीयतुर्यौगमध्यगोयस्याः चपलेतिनामतस्याः
प्रकीर्तितंनागराजेन ५ आद्यंदलंसमस्तंभजेतलक्ष्मचपलागतंयस्याः शेषेपूर्व
जलक्ष्मामुखचपलासोदितामुनिना ६ प्राकृतिपादितमर्धेप्रथमेप्रथमेतरेचु
चपलायाः लक्ष्माश्रयेतसोक्ताविशुद्धधीभिर्जघनचपला ७ इत्यार्याप्रकरणं
आर्याप्रथमदलोक्तंयदिकथमपिलक्षणंभवेदुभयोः दलयोःकृतयतिशोभां
तांगीतिंगीतवान्भुजंगेशः ८ आर्याद्वितीयकेर्धेयद्गदितंलक्षणंतत्स्यात् य
द्युभयोरपिदलयोरुपगीतिंतांमुनिर्ब्रूते ९ आर्याशकलद्वितयंव्यत्ययरचितंभ
वेद्यस्याः सोद्गीतिःकिलगदितातद्वद्यंशभेदसंयुक्ता १० आर्यापूर्वार्धंयदि

गुरुणैकेनाधिकेन निधने युक्तं इतरत्तद्वन्निखिलं यदीयमुदितासुधीभिरार्यागी
तिः ११ गीतिप्रकरणं षड्विषमेऽष्टौ समे कलास्ताश्च समे स्युर्नो निरंतराः न समा
त्र पराश्रिता कलवैतालीयेंते रलौ गुरुः १२ पर्यंते र्यौ तथैव शेषमौपछंदसिकं सुधी
भिरुक्तं आपातलिकाकथितेयं भाद्गुरुकावथ पूर्ववदन्यत् १४ तृतीययुग्दक्षि
णांतिकासमस्तपादेषु द्वितीयः १५ उदीच्यवृत्तिर्द्वितीयलः सक्तोयेण वश्चवेद्युग्म
योः १६ पूर्वेणयुतोथपरस्तु प्राच्यवृत्तिरुदितेति युग्मयोः १७ यदासमावोजयु
ग्मकौ पूर्वयोर्भवति तत्प्रवृत्तकं १८ अस्ययुग्मरचितापरांतिका १९ अयुग्भवा चा
रुहासिनी २० वैतालीयंप्रकरणं वक्त्रंनाद्यान्नसौ स्यातामब्धेर्योनुष्टुभिख्यातं
॥२१॥ युजोर्जेन सरिद्भर्तुः पथ्यावक्त्रं प्रकीर्तितं २२ ओजयोर्जेन वारिधेस्तदेव वि 3
परीतादि २३ चपलावक्त्रमयुजोर्नकारश्चेत्पयोराशेः २४ यस्यां लः सप्तमो युग्मे
सायुग्मविपुलामता २५ सैतवस्याखिलेष्वपि। भेनाब्धितो भाद्विपुला २६

इत्थमन्यारसर्तुर्यात् २७ नोंबुधेश्चेन्नविपुला २८ तोब्धेस्तत्पूर्वान्याभवे
त्॥२९ अनुष्टुप्प्रकरणं अथवृत्तानि द्विकगुणितवसुलघुरचलधृति
रिति॥३० मात्रासमकं नवमोल्गांतं ३१ जोन्त्यावथांबुधेर्विश्लोकः ३२ त
द्युगलाद्वानवासिका स्यात् ३३ अष्टाभ्यो भाद्भा चूपचित्रा ३४ बाणाष्ट
नवसु यदि लश्चित्रा ३५ पदतीतकृतविविधलक्ष्मयुतैर्मात्रासमादिपादैः क
लितं अनियतवृत्तपरिमाणसहितं प्रथितं जगत्सुपादाकुलकं ३६ वृत्तस्य
लोविनावर्णैर्गौवर्णा गुरुभिस्तथा गुरवोलैर्दलेनित्यं प्रमाणमिति निश्चि
तं ३७ शिखिगुणितदशलघुरचितमपगतलघुयुगलमपरमिदमखिलं।
खगुरुशकलयुगलकमपि सुपरिघटितललितपदवितति भवति शिखा ३८
विनिमयविहितशकलयुगलघुकलितपदविततिविरचितगुणानिचया

श्रुतिसुखकृदियमपि। जगति जरिर उपगतवति निसति भवति खजा ३९
अष्टवधैर्गा ध्यायस्तायस्याः सानंगक्रीडोक्ता। दलमपरमणिवसुगुणि
तसलिलनिधिलघुकविरचितपदविततिर्भवति ४० त्रिगुणनवलघुर
वसितिगुरुरितिदलयुगकृततनुरतिरुचिरा ४१ इति वृ॰ मात्रा
वृत्ताध्यायो द्वितीयः २ उक्ता १ श्रीः ग। प्र २ अत्युक्ता २ गौ स्त्री। प्र ४ मध्या ३
मो नारी॥ रो मृगी। प्र ८। प्रतिष्ठा ४ म्गौ कन्या। प्र १६ सुप्रतिष्ठा ५ भ्गौ गि
ति पंक्तिः प्र ३२ गायत्री ६ त्यौ स्तस्तनुमध्या मी। शशिवदना न्यौ। त्सौ वसुम
ती। प्र ६४ उष्णिक् ७। मधुमति ननगाः। कुमारललिता ज्सौ ग। म्सौ गः ४
स्यान्मदलेखा। चूडामणिस्तभगाः। सरगैर्हंसमाला। प्र १२८ अनुष्टु
प् ८ भौ गिति चित्रपदा गः। मो मो गो गो विद्युन्माला। माणवकं भात्तलगौः

म्नौ गौ हंसरुतमेतत्। ज्रौ समानिका गलौ रः। प्रमाणिका जरौ लगौ। नारा
चकं तरौ लगौ। वितानमाभ्यां यदन्यत्। प्र २५६ बृहती ९ रान्नसाविह हलमु
खी भुजगशिशुसृता नौ मः ५१२ पंक्तिः १० म्सौ ज्गौ शुद्धविराडिदं मतं म्नौ
य्गौ चेति पणवनामेदं। ज्रौ ज्गौ मयूरसारिणी स्यात्। भ्मौ सयुक्तौ रुक्मवतीयं
ज्ञेया मत्ता मभसगयुक्ता। नरजगैर्भवेन्मनोरमा। चंपकमाला चेद्भमसा गः
प्र १०२४ त्रिष्टुप् ११ त्रौ ज्गौ गुरुणेयमुपस्थिताख्या। स्यादिंद्रवज्रा यदि तौ ज
गौ गः। उपेंद्रवज्रा जतजास्ततो गौ। अनंतरोदीरितलक्ष्मभाजौ पादौ यदीयावु
पजातयस्ताः। इत्थं किलान्यास्वपि मिश्रितासु स्मरंति जातिष्विदमेव नाम
सांद्रपदं भ्तौ नगगुरुभिश्च। नजजलगैर्गदिता सुमुखी। दोधकवृत्तमिदं भभ
भाद्गौ। शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैः। वातोर्मीयं गदिता म्भौ तगौ गः।
पंचरसैः श्रीर्भतनगगैः स्यात्। म्भौ न्लौ गः स्याद्भ्रमरविलसिता। रोनराविह रथो

द्रुतालगौ स्वागतेतिन्नरभाद्गुरुयुग्मं ननसगगुरुरचिता वृन्ता ननरलगुरुभि
श्चभद्रिका श्येनिकारजौरलौगुरुर्यदा शिखंडितमिदं ज्सौतौगुरुश्चेत् उप
स्थितमिदं ज्सौताद्गकारौ मौक्तिकमाला भवेद्भतलगाः प्र.२-न्न जगती १२ चंद्र
वर्त्मगदितंतु रनभसैः जतौतु वंशस्थमुदीरितं जरौ स्यादिंद्रवंशा ततजैरसंयुतैः
चतुर्जगणं वद मौक्तिकदाम इह तोटकमंबुधिसैः प्रथितं द्रुतविलंबितमाह नभौ
भरौ वसुयुगविरतिर्नौ म्यौ पुटोयं प्रमुदितवदना भवेन्नौ ररौ नयसहितौ न्यौ
५ कुसुमविचित्रा भुजंगप्रयातं भवेद्यैश्चतुर्भिः रैश्चतुर्भिर्युता स्रग्विणी संमता भुवि
भवेन्नभजरैः प्रियंवदा रसैर्जसजसा जलोद्धतगतिः त्यौ त्यौ मणिमाला छिन्ना ५
गुहवक्त्रैः धीरैरभ्यारि ललिताताभौजरौ प्रमिताक्षरा सजससैरुदिता नंन
भरसहिताभिहितोज्ज्वला पंचाश्वैश्छिन्ना वैश्वदेवी ममौ यौ अब्ध्यंगैः स्याज्ज
लधरमाला म्भौ स्मौ इह नवमालिनी नजभयैरो म्यो स्वरशरविरतिर्ननौ रौ प्रभा

जरौजरौ वदंति पंचचामरं भवति नजावथ मालती जरौ इह वदन्तामरसं नजजाद्यः
भवति ततिनर्नभजजैरसंयुतैः त्यौ त्यौ विरतिनिर्दिष्टा पुष्पविचित्रा प्र.४.१६ अतिजग
ती १३ तुरगरसयतिर्नौ ततौ गः क्षमा म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयं चतुर्ग्रहै
रिह रुचिरा जभौ सजौ गः वेदैरश्वैर्म्तौ यसगा मत्तमयूरः उपस्थितमिदं ज्सौ त्सौ यदि
गुरुः स्यात् सजसा जगौ भवति मंजुभाषिणी जतौ जसौ भवति मंजुवादिनी नेन
ततगुरुभिश्चंद्रिकाश्वैश्चतुर्भिः इह नंदिनी सजससैर्गुरुयुक्तैः कुटिलगतिर्नजौ सप्त
भिस्तौ गुरुः प्र ८-१९२ शक्वरी १४ म्नौ सौ गौ वक्षयहविरतिरसंबाधा ननरसलघु
गैः स्वरैरपराजिता ननभनलगिति प्रहरणकलिता उक्ता वसंततिलका तभजाज
गौ गः सिंहोन्नतेयमुदिता मुनिकश्यपेन उद्धर्षिणीति कविराजवसुंधरेण गोमे
नसेन गदितां मधुमाधवीति इंदुवदना भजसनैः सगुरुयुग्मैः द्विः सप्तच्छिद् लोला
म्सौ म्भौ गौ स्वरणैश्चेत् प्र १६३८४ अतिशक्वरी १५ द्विहतहयलघुरथ गिति शशिकला

स्वगितिर्भवतिरसनवकयतिरियं वसुहययतिरिहमणिगुणनिकरः ननमयययुते
यंमालिनीभोगिलोकैः भवतिनजौभजौरसहितौप्रभद्रकं सजनानयौरारदशाकवि
रतिरेला म्रौम्यौयांतौभवेतांसप्ताष्टकेश्चंद्रलेखा कामक्रीडाछंदोजातं ह्रस्वाम्भाभ्यां
भैश्च नजभजरैर्विराजितमिदंसुकेसरं भवतःसजौससयुतावृषभस्ततायः चंद्रलेखा
भिधारौम्यौयोविरामःस्वराष्टौ प्र· ३२७६८ अष्टिः १६ चत्रिनगैःस्वरातवमृषभग
जविलसितं नजभजैःसदाभवतिविणिनीगयुक्तैः पंचभकारकृताऽश्वगतिर्गदि
ताऽतगुरुः लघुगुरुनिरंततोरौयदासपंचचामरः प्र ६५५३६ अत्यष्टिः १७ रसैरी
शैश्छिन्नायमनसभलागःशिखरिणी जसौजसयलावसुग्रहयतिश्चपृथ्वी
गुरुः दिङ्मुनिवंशपत्रपतितंभरनभनलगैः स्वरयुगहयेन्सौम्रौस्लोलौय ६
दाहरिणीतदा मंदाक्रांताजलधिषडगैर्म्भौनतौताद्गुरूचेत्‌ ससजैरतिशायि
नीभवेन्मजपरैर्गुरुभ्यां यदिभवतोनजौभजजलागुरुनर्कुटकं मुनिगुहकार्णवैः

कृतयतिवदकोकिलकं प्र १३१०७२ धृतिः १८ स्याद्भूतर्त्वश्वैःकुसुमितलतावेल्लिता
म्तौनयौयौ दशशिखिविशारम्भविरामाननौरारसौरौचप्रिया दशावसुविरतिर्ननौरै
श्चतुर्भिर्युतालालसा प्र २६२१४४ अतिधृतिः १९ रसर्त्वश्वैर्य्यौन्सौररगुरुयुता
मेघविस्फूर्जितास्यात्‌ सूर्याश्वैर्मसजस्तताःसगुरवः शार्दूलविक्रीडितं प्र ५२४२८८
कृतिः २० ज्ञेयासप्ताश्वषड्भिर्मरभनययुताम्लौगःसुवदना जौरजौलगलौभवेदि
हवृत्तलक्षणेन वृत्तनाम प्र १०४८५७६ प्रकृतिः २१ म्रभ्नैर्यानांत्रयेणत्रिमुनिय
तियुतास्रग्धराकीर्तितेयं प्र २०९७१५२ आकृतिः २२ यदिहनजौभजौभजौनलगा
स्तदाऽश्वललितंहरार्कयतिमत्‌ मत्ताक्रीडाम्मौत्नौनौग्लौगिति भवतिवसुशर
दशयतियुतं प्र ३८ ८६०८ संकृतिः २४ भततमुनिनैर्यादितिरिहभतनाः सस्भभ
नयाश्चयदिभवतितन्वी प्र १६७७७२१६ अभिकृतिः २५ क्रौंचपदाभ्मौभ्मौननननाग
युशरवसुमुनिविरतिरिहभवेत्‌ प्र ३३५५४४३२ उत्कृतिः २६ वस्वीशाश्वछेदोपेतंमम

तनयुगा नरसलगैर्भुजंगविजृंभितं मोनाः षट्सगगितियदिनवरसरसशरयतियुतमु
पवाहाख्यं प्र ६७१०८८ ६४ यदिहनयुगलं ततः सप्तरेफास्तदा चंडवृष्टिप्रयातो भवेद्दंडकः
प्रतिचरणविवृद्धरेफाः स्युरर्णार्णवव्यालजीमूतलीलाकरोद्दामशंखादयः २ प्रचितकसम
भिधो धीरधीभिः स्मृतो दंडको नद्वयादुत्तरैः सप्तभिर्यैः ३ इति दंडकजातयः इति वृत्तरत्ना
कराख्ये छंदसि तृतीयोध्यायः श्री। विषमे यदि सौ सलगा दले भौ युजि भाद्गुरुकावुपचित्र
१ भत्रयमोजगतं गुरुणी चेद्युजि नजौ ज्यजयुतौ द्रुतमध्या २ सयुगात्सगुरू विषमे चेद्भा
विह वेगवती युजि भाद्गुरू ३ ओजे तपरौ जरौ गुरुश्चेत् म्सौ ज्गौ भद्रविराड्भवेदनोजे ४
असमे सजौ सगुरुयुक्तौ केतुमती समे भरनगाद्गः ५ आख्यानकी तौ जगुरू गमोजे जतावनो
जे जगुरू गुरुः स्यात् ६ जतौ जगौ गो विषमे समे स्यात्तौ ज्गौ गमेषा विपरीतपूर्वा ७ सयु
गात्सलघू विषमे गुरुर्युजि नभौ भरकौ हरिणप्लुता ८ अयुजि ननरला गुरुः समे जमपरवक्त्र
मिदं ततो जरौ ९ अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा १० वदंत्य
परवक्त्राख्यं वैतालीयं विपश्चितः पुष्पिताग्राभिधं केचिदौपच्छंदसिकं तथा ११ स्यादयुग्म

के रजौ रजौ समे तु जरौ रजौ गुरुर्यवासरामतीयं १२ इति अर्धसमाध्यायश्चतुर्थः
मुखपादोष्टभिर्वर्णैः परस्मान्मकरालये क्रमाद्वृद्धः सततं यस्य विचित्रैः पादैः संपन्नसौंदर्यं
तदभिहितममलधीभिः पदचतुरूर्ध्वाभिधं वृत्तं १ प्रथममुदितवृत्तैश्चरचितविषमचरण
भाजि गुरुयुगलकनिधन इह कलितआडाचितरुचिरपदविततयतिरीतिर्भवति पीडः
२ प्रथममितरचरणसमुच्छ्रितं श्रयति जगति लक्ष्म इतरदितरजनितमपि यदि तु यं
चरणयुगलकमविकृतमपरमिति कलिका सा ३ द्विगुरुयुतसकलचरणांतामुखचरणर
चितमनुभवति तृतीयः चरण इह हि लक्ष्म प्रकृतमपरमखिलमपि यदि भवति लवली सा
४ प्रथममधिवसति यदि तुर्यं चरमचरणपदमवसितिगुरुयुग्म। निखिलमपरमुपरि
तनसमिह ललितपदनर्तनयममृतधारा ५ पदचतुरूर्ध्वप्रकरणं सजमादिमे सल
घुकौ चनसजगुरुकेष्वथोद्गता त्र्यधिगतभनजलागयुता सजसा जगौ च रसमएकतः
पठेत् ६ चरणत्रयं भजतिलक्ष्म यदि सकलमुद्गतागतं नौ भगौ भवति सौरभकं चर

…दाहिभवतस्तृतीयके ७ नयुगंसकारयुगलंच भजौतिचरणांततीयकं तदु
दितमुरुमतिभिर्ललितंयदिशेषमस्यखलुपूर्वतुल्यकं ८ उद्गताप्रकरणं
स्तोज्भौगौप्रथमांघ्रिरेकतःएवमन्यत्र त्रितयंसनजरगास्तथाननौसस्त्रिनपरि
कलितजयोप्रचुपितमिदमुदितमुपस्थितपूर्वं ९ नौपादेयत्तृतीयकेसनौनसयुक्तो
प्रथमांघ्रिकृतयतिस्त्वर्धमानंत्रितयमपरमपिपूर्ववसदत्रामिहभवतिजलतमतिभि
रितिमहितंखलुवृत्तं १० अस्मिन्नेवतृतीयपादकेतजरास्युः प्रथमेवाविरतिरार्षेन्नंबु
वंतितच्छुद्धविराड्भूरःस्थितंत्रितयमपरमपियदिपूर्वसमंस्यात् ११ उपस्थितप्रचुपि
तप्रकरणं विषमाक्षरपादंवापादैरसमंदशधर्मवत् यच्छंदोनोक्तमत्रगाथेति
तत्सूरिभिःप्रोक्तं १२ इतिवृत्तरत्नाकराख्येछंदसिविषमवृत्ताख्यःपंचमोध्या
यः ५ प्रस्तारोनष्टमुद्दिष्टमेकद्व्यादिलगक्रिया संख्यानेवाध्वयोगश्च षडेतेप्रत्यया
मताः १ पादेसर्वगुरावाद्याल्लघुंन्यस्यगुरोरधः यथोपरितथाशेषं भूयःकुर्यादमुंविधिं।
ऊनेदद्याद्गुरूनेवयावत्सर्वलघुर्भवेत् प्रस्तारोयंसमाख्यातश्छंदोविचितिवेदिभिः। ८

वृत्तरत्नाकर
८

प्रस्तारः नष्टस्ययोभवेदंकस्तस्यार्धेर्धेसमेचलः विषमेचैकमाधायदेर्तंधेर्धेगुरुर्भवे
त् ४ नष्टं उद्दिष्टंद्विगुणानाद्यादुपर्यंकान्समालिखेत् लघुस्थायेतुतत्रांकास्तैः
सर्वैर्मिश्रितैर्भवेत् ५ उद्दिष्टं वर्णान्वृत्तभवान्सैकानौत्तराधर्यतःस्थितान् एकादि
क्रमशश्चैतानुपर्युपरिनिक्षिपेत् ५ उपांत्यतोनिवर्तेतत्यजेन्नैकमधतः उपर्याद्यादुरोरेवमे
कद्व्यादिलगक्रिया ६ इतिएकद्व्यादिलगक्रिया लगक्रियांकसंदोहेभवेत्संख्याविमि
श्रिते उद्दिष्टांकसमाहारःसैकोवाजनयेदिमा ७ संख्या संख्यैकद्विगुणैकोनासद्भिरध्वा
प्रकीर्तितः वृत्तस्यांगुलिकींव्याप्तिमधःकुर्यात्ततोगुर्लं ८ अध्वा वंशेभवत्तत्रयपस्य
प्रकटगुणगणःशैवसिद्धांतवेत्ताविप्रःपव्येकनामाविमलतममतिर्वेदतत्वावबोधे के
दारास्तस्यसूनुःशिवचरणयुगाराधनैकाग्रचित्तश्छंदःस्तेनाभिरामंप्रविरचितमिदंवृत्तरत्ना
कराख्यं १० इतिश्रीभट्टकेदारविरचितेवृत्तरत्नाकराख्येछंदसिषट्प्रत्ययानयनप्रस्तारनिरू
पणंनामषष्ठोध्यायःग्रंथश्चसमाप्तः ६ हस्तपत्राअपत्येत्यादितुल्यअनिबंदाक्षस्तत्रेमि